श्रीगणेशायनमः।। अकारे विजयश्चैव अर्थलाभस्तथैवच।। देशांतरे भवेल्लाभश्चिंतितंसफलंभवेत्।।१।।
आकारे शोकसंप्राप्तो विरोधः सहबांधवैः।। प्रवासेच भवेद्दिद्धंपश्चान्नाशंविनिर्दिशेत्।।२।। इकारेचार्थ
लाभश्च विद्यांबंधुसमागमः।। सिद्धिपौत्रेचदृश्यंते स्थिरंकार्यंभविष्यति।।३।। ईकारेसर्वकार्याणि
दृश्यतेशोभनानिच।। सिद्धिश्चसर्वकार्येषुसन्मानंशोभनंभवेत्।।४।। उकारेशोकहानिंचविघ्नंकार्ये
षुजायते।। उद्वेगस्थानभंगश्चजायतेनात्रसंशयः।।५।। ऊकारेसर्वसिद्धिश्चक्षेममारोग्यमेवच।।
मित्रसंगमलाभश्चलभ्यतेनात्रसंशयः।।६।। ऋकारेदृश्यतेहानिर्जनानांचविशेषतः।। संतापश्च
तुउद्वेगःप्राप्नोतिमरणंध्रुवं।।७।। ॠकारेसर्वकार्याणिदृश्यंतेशोभनानिच।। संप्राप्नोतिधनंशीघ्रं
लोकेहयसमागमः।।८।। ऌकारेधननाशश्चसंतापश्चैवदृश्यते।। अर्थनाशोमहाक्लेशोबांधवानां
1 चदृश्यते।।९।। ॡकारेचार्थसंप्राप्तिर्वरस्त्रीणांसमागमः।। मित्रपूजाभवेच्छीघ्रंसन्मानंविजयस्त
था।।१०।। एकारेमृत्युरोगश्चकुशरोगभयंतथा।। मित्रैसहविरोधश्चसंपन्नंशोभवेद्ध्रुवं।।११।। ऐ
कारेदृश्यतेकामोविविधोविपुलस्तथा।। सिद्धिश्चसर्वकार्येषुशत्रुर्मित्रवदाचरेत्।।१२।। ओ
कारेभावसिद्धिश्चसुखानिविविधानिच।। मित्रेणसहसंगश्चवरस्त्रीलाभएवच।।१३।। औकारेधनहा
निश्चचिंतितंचनिरर्थकं।। यथोक्तंचिंतितंकार्यंतथोन्नंचभविष्यति।।१४।। अंकारेलभतेमृत्युंशो
करोगस्तथैवच।। अर्थहानिर्भवेत्तस्यनात्रकार्याविचारणा।।१५।। अःकारेधनसंप्राप्तिर्लभतेतेचे

वजायते॥सुखंतुविन्तयंतस्य कर्त्तव्येनैवसंशयः॥१५॥ककारेलभते सिद्धिंधनधान्यादिसंपदां॥
१ मित्रलाभोभवेद्वृद्धिःसर्वकार्यफलप्रदा॥१६॥खकारेमोक्षसंतप्तोवरिष्ठरोगसंभवः॥शत्रूणांचवि
रोधंतुभयंरोगश्चजायते॥१७॥गकारेधनसंप्राप्तिर्द्रव्यलाभस्तथैवच॥पुत्रदारैश्चसंयोगःसं
पदामधिपोभवेत्॥१८॥धकारेधनसंप्राप्तिर्द्रव्यलाभस्तथैवच॥सौख्यंयामश्चदृश्यते॥अंत
रेतुप्रजालाभोराज्यलाभोमहत्सुखं॥१९॥ङकारेउत्तमावृद्धिःसुखानिविविधानिच॥देशां
तरगतेलाभंसर्वत्रलभतेसुखं॥२०॥चकारेचिंतितंकार्यंनिष्फलंचभविष्यति॥मित्रहानिश्च
शोकश्चशरीरेरोगसंभवः॥२१॥छकारेआगमोलक्ष्म्याःपश्चाद्हस्तोचदृश्यते॥कांचनस्यभ
वेत्प्राप्तिःसर्वमंगलसंपदां॥२२॥२३॥जकारेचिंतितंकार्यंसर्वंचैवनदृश्यते॥मित्रैःसहविरोधश्च
लभतेतस्यमाकुले॥२४॥झकारेधनसंप्राप्तिर्सौभाग्यंलभतेनरः॥अर्थलाभोवस्त्रलाभोग
हलाभस्तथैवच॥२५॥ञकारेजायतेक्लेशोव्याधिश्चैवमहाबलः॥बंधुनाशोपुत्रनाशोध
धननाशस्तथैवच॥२६॥टकारेत्वर्थनाशश्चबंधुनाशस्तथैवच॥पश्चाद्दारेशसंतापो
लभतेनात्रसंशयः॥ठकारेसर्वसौख्यानिकार्याणिचफलानिच॥अकुशोनैवलभतेलक्ष्मीस
र्वार्थदायिनी॥२८॥ [illegible] कार्येषुदृश्यतेनात्रसंश १

यः॥२९॥ढकारेचार्थसिद्धिश्चभवेत्सर्वसुसंपदां॥यथाचचिंतितंकार्यंतथाचसुफलंभवेत्॥३०॥णका
रेसुफलंकार्यंस्वजनैर्लाभएवच॥स्त्रीणांसमागमश्चैवलभतेनात्रसंशयः॥३१॥तकारेधनसंप्राप्तिस्त
थाचगमनंशुभं॥मनोरथाश्चसुलभालभतेनात्रसंशयः॥३२॥थकारेधनधान्यंचआरोग्यंसुखसं
४ सुखपदां॥तथाचचिंतितंकार्यंदृश्यतेनात्रसंशयः॥३३॥दकारेसंप्राप्तिरर्थश्चैवप्रजायते॥आरोग्यंल
भतेसौख्यंसिद्धिश्चैवप्रजायते॥३४॥धकारेदीर्घमायुष्यंसफलंकार्यमेवच॥तथाचचिंतितंका
तृ र्यंआपूर्वंतंभविष्यति॥३५॥नकारेसुखहानिश्चनिषिद्धंचैवजायते॥तथाचचिंतितंकार्यंत
त्सर्वंनभविष्यति॥३६॥पकारेपापकर्माणिपापयुक्तश्चदृश्यते॥अन्यत्तुजायतेतस्यअभयं
चभयंभवेत्तदिहं॥३७॥फकारेलभतेवस्त्रंभक्ष्यभोज्यंतथैवच॥परहस्तानुसंप्राप्तप्रार्थना
२ रिपुबंधनं॥३८॥बकारेचार्थसंप्राप्तिःवुस्त्रीणांसमागमः॥अन्यथाचिंतितंकार्यंसफलंसर्व
मेवच॥३९॥भकारेसर्वसिद्धिश्चसर्वसौख्यफलप्रदं॥बहुकांचनरौप्यंचभवेमेवनसंशयः॥४०
॥मकारेधननाशश्चमस्तकेमूर्छमेवच॥शोकश्चदृष्टिनाशश्चअर्थनाशोनसंशयः॥४१॥यका
रेलभतेवस्त्रंधनधान्यादिसंपदः॥शत्रूणांजयश्चैवदृश्यतेनात्रसंशयः॥४२॥रकारेविपुलं
सौख्यंआरोग्यंशोभनंभवेत्॥सर्वकार्यफलंलक्ष्मीलभतेनात्रसंशयः॥४३॥लकारेशोकसं
तापौलभतेनचसंपदः॥सर्वनिरर्थकंकार्यंहानिश्चैवतुजायते॥४४॥वकारेबहुलक्ष्मीचल २

२

अ	आ	इ	ई	उ	ऊ	ऋ	
ज	झ	ञं	ट	ठ	ड	ॠ	
छ	ण	मा	य	र	ढ	ऌ	
च	ब	स	ह	ल	ल	ॡ	
ङ	फ	ष	श	व	न	ए	
घ	प	ना	ध	द	थ	ऐं	ॐ
ग	ख	क	अः	अं	औ	ओ	क्षः

२

रणंदशादले· ॐ धूम्रार्चिषायैनमः ॐ ऊष्मायै· ॐ ज्वलिन्यै· ॐ ज्वालिन्यै· ॐ विस्फुलिंगिन्यै· ॐ सुश्रियै· ॐ सुरूपायै·
ॐ कपिलायै· ॐ हव्यवाहायै· ॐ कव्यवाहायै· अथद्वादशदले· ॐ तपिन्यै· ॐ तापिन्यै· ॐ धूम्रायै· ॐ मरीच्यै· ॐ ज्वा
३ लिन्यै· ॐ रुच्यै· ॐ सुषुम्नायै· ॐ भोगदायै· ॐ विश्वायै· ॐ बोधिन्यै· ॐ धारिण्यै· ॐ क्षमायै· अथषोडशदलेषु· ॐ
अमृतायै· ॐ मानदायै· ॐ पूषायै· ॐ तुष्ट्यै· ॐ पुष्ट्यै· ॐ रत्यै· ॐ धृत्यै· ॐ शशिन्यै· ॐ चंद्रिकायै· ॐ कांत्यै· ॐ ज्योत्स्ना
ॐ श्रियै· ॐ प्रीत्यै· ॐ अंगदायै· ॐ पूर्णायै· पूर्णामृतायै· अथाष्टदलेषु· अणिमायै· महिमायै· गरिमायै· लघि
मायै· प्राप्त्यै· प्राकाम्याय· ईशितायै· वशितायै· ततःबहिर्भूगृहे· कश्यपाय· इंद्राय· वज्राय· इतिप्राच्यां· अत्रये· अग्नये·
3 शक्तये· इत्याग्नेय्यां· भरद्वाजाय· यमाय· दंडाय· इतिदक्षिणे· विश्वामित्राय· निर्ऋतये· खड्गाय· इतिनैर्ऋत्यां· गौ
तमाय· वरुणाय· पाशाय· इतिप्रतीच्यां· जमदग्नये· वायवे· अंकुशाय· इतिवायव्यां· वसिष्ठाय· कुबेराय· गदा
यै· अहस्युत्तरस्यां· अगस्त्याय· ईशानाय· त्रिशूलाय· इति ईशान्यां· पूजनंतु सर्वत्रक्रमवगंतव्यं· इतिप्रयोगार्ण
वे ऋक्प्रयोगपटलेमन्युसूक्तविधानंसमाप्तम्: ३

कामनासिध्यर्थे जपेत्‌। अथ न्यासः। यस्ते मन्यो इति शीर्षे। मन्युरिन्द्रो इति ललाटे। अभीहि मन्यो। नेत्रयोः। त्वया मन्यो।
कर्णयोः। अभागः सन्निति नासिकायाम्‌। अयं ते अस्मीति मुखे। अभि प्रेहीति हृदये। त्वया मन्यो। बाह्वोः। अग्निरिव
हस्तयोः। सहस्व मन्यो। नाभौ। एको बहूनां गुह्ये। विजेषकृत्‌। जान्वोः। आभूत्या। जंघयोः। संसृष्टं धनं। पादयोः। इत्यंग
न्यासः। वह्निमूर्तये हृ। सूर्यमूर्तये शिरसे। सोममूर्तये शिखायै। वायुमूर्तये कवचाय हुं। संवर्तकमूर्तये नेत्र। विद्यु
न्मूर्तये अस्त्राय। संसृष्टं धनमुभयं अंगुष्ठाभ्यां। समाकृतमस्मभ्यं दत्तां। तर्जनीभ्यां। वरुणश्च मन्युः। मध्यमाभ्यां।
भियं दधाना हृदयेषु। अनामि। शत्रवः पराजितासः। कनिष्ठिका। अपनिलयं तां। करत। एवं हृदयादि। अथ ध्यानं
ज्वलनार्कप्रतीकाशं जटामंडलमंडितम्‌। आलम्बिया विराजन्तं दीप्यमानमुखाम्बुजम्‌। पद्मासनसमासीनं ध्याये
त्तं ध्यानमुद्रया। ध्यायेत्तं तापसश्रेष्ठं मालाभीष्टधरं परम्‌। अथ पीठपूजा। ॐ आधारशक्त्यै। कूर्माय। वराहाय।
ॐ भूः पीठाय। ॐ भुवः पीठाय। ॐ स्वः पीठाय। ॐ भूर्भुवः स्वः पीठाय। इति पीठपूजा। पीठोपरि यंत्रं लिखेत्‌। तद्य
था। मध्ये षट्कोणं तदुपरि दशदलं तनो द्वादशदलं ततः षोडशदलं ततो ष्टदलमिति। षट्कोणमध्ये तत्पो मन्युमू
र्तये मन्यवे परदेवताये नमः। षट्कोणे। प्रागादि। ॐ वह्निमूर्तये हृदयं पूजयामि। सूर्यमूर्तये शिरः। सोममूर्तये
शिखां। वायुमूर्तये कवचं। संवर्तकमूर्तये नेत्रत्रयं। विद्युन्मूर्तये अस्त्रं इति प्रथमावरणम्‌। द्वितीयाव

नेत्रिशूलं जपेत्. तिलैर्होमः सूक्तेनाभिषेकः कपालारिष्टकपोलमूलादेः सर्वारिष्टेषु परस्परं द्वेषपरिहारेण
सर्वास्विष्टेषु मित्रतास्मि प्रार्थं नदीद्वयसंगमे पंचसहस्रं जपेत्. त्रिमधुराक्तैर्दूर्वाखंडैर्गुग्गुलैक्षुदंडैर्वा
२ होमः मित्रतासि द्वि: राजद्वेषपरिहारार्थं बाहवायक्षमभिद्वि: सहस्रं त्रिमधुराक्तैर्जुहुयात् जपां
ते सा ध्यना मंगरहीत्वा तं प्रसादयामीत्यष्टाविंशत्यंजलीर्दद्यात्. तेन राजा प्रसीदति. लक्ष्मीप्राप्त्यर्थं अष्टदल
द्वीपान् देवायतने प्रज्वाल्य अष्टसहस्रं जपेत्. बिल्वपत्रैस्त्रिमधुराक्तैर्होमः दुग्धेन दशांशेन तर्पणम्. पं
चरवाद्यैर्वा होमः जपसमये मंत्रन्याससमये लक्ष्मीबीजं एवं केप्रयोगः ध्याने पिस्कंधराशा होम ध्यस्थां पी
मर्त तांबरं धियायेत्. वरदाभयहस्तां च प्रार्थयेत्. लक्ष्मीप्राप्तिर्भवति ध्यं ध्यामां पुत्रप्रजनार्थं लक्षं पुरश्चरणे जीव
पुत्रफलैर्होमः प्रतिदिनं सूक्ताभिमंत्रितैर्दशघटैः स्नापयेत्. जपसमाप्तिविधिः अश्वत्थमूले जपहोमौ कृत्वा तु
५ दिने सूक्ताभिमंत्रितं नागकेसरं सूत्रेण पाययेत्. पुत्रप्राप्तिः नष्टप्राप्त्यर्थं दशसहस्रं जपेत्. कमलैः शतप
त्रैर्वा होमः वांछितार्थप्राप्तिर्भवति. इति नियोगदीपिकायां मन्युसूक्तविधानम्. प्रयोगार्णवे. चतुर्दशार्चमेकं
सूक्तम्. यस्ते मन्यो इति सूक्तस्य तापसो मन्युर्ऋषिः त्रिष्टुप् छंदः आद्यास्तिस्रः त्यास्य जगत्यः मन्यु
र्देवता. मन्युरिंद्रो मन्युरेवास देव इति बीजं. अभीहि मन्यो इति शक्तिः संसृष्टं धनमिति कीलकं. अमुक

२

स्रजां कृत्वा विसर्जयेत् ॥ अथ मन्युसूक्तविधानम् ॥ यस्ते मन्यो अथ मंत्रस्य सर्वसूक्तम् ॥ अस्य तापसो मन्युरृ
षिः मन्युर्देवता त्रिष्टुप् छंदः अथ मंत्रपंक्तिः त्वया मन्यो द्वितीयं मंत्रस्य सर्वसूक्तम् ॥ तस्यापि ऋष्यादिपूर्ववत् ॥
अस्याभ्यन्तरोऽजगत्यः शत्रुपराजयार्थे विनियोगः नत्वादौ शरीरशुद्ध्यर्थं विविक्तदेशे देवतायतने वा श्मशा
ने ग्रामाद् बहिः अशुचौ देशे सर्वग्रामाद् बहिर्वा पुरश्चरणं कार्यम् ॥ महाशत्रुपराजयार्थे द्वादशलक्षं पुरश्च
रणम् ॥ मध्यमशत्रुपराजयार्थे द्वादशसहस्रं सामान्यशत्रुपराजयार्थे द्वादशशतं ब्राह्मणेन प्रयोक्तव्यम् ॥
सर्वेषामुपकारार्थं बहूनां सार्थेन आप्रयोक्तव्यम् ॥ आहाडकस्य व्याधिरस्य समिद्भिः प्रत्यहं वशीकरणा
र्थं जुहुयात् ॥ इध्मश्च वृक्षविशेषेण फलप्रदः राजवश्यार्थे ग्राममध्ये जपेत् ॥ लोकवश्यार्थे तथैव दुष्टशत्रु
परिहारार्थे श्मशाने मध्ये जपेत् औदुंबरः इध्मः पंचखाद्यैर्होमः रोगनाशार्थे देवतास्थाने जपेत् ॥ प्रत्यहं निम्ब
करादशुतेराम्रपत्रैर्होमः रोगोक्तौषधीभिर्होमः सक्तुद्वयेन पायसेन मन्युं न पयामीति दुग्धेन होमसंख्यया
तर्पयेत् ॥ दशांशेन रोगिणां मार्जनम् ॥ महारोगान् निवर्तन्ते ॥ ग्रहपीडानिवृत्त्यर्थं सहस्रं जपेत् ॥ आदित्यादि दि
ग्विशेषेण होमः दुष्टग्रहपीडा निवर्तते ॥ अथ मृत्युपरिहारार्थं ममृतमयं चंद्रमंडलं स्वनवमृतधा
रं ध्यायेत् त्रिसहस्रं जपेत् कापिलाज्येन दध्ना दुग्धेन चरुणा मिश्रितहोमः मार्जनं च एवं वित् दुष्टस्य जनदर्श

उपास्महे देवराजं भक्त्या शत्रुनिषूदनम्. इति ध्यानम्. वज्रं शक्तिं च दंडं च खड्गं पाशध्वजाम्बुजा. गदां त्रिशूलं परिघं
१ चक्रं चैव दशायुधम्. घृतान्नं तिलपिष्टान्नं माषान्नं घृतपायसम्. प्रागादिक्रमशो भुक्त्वा भानुवारादिक्रमात्.
कुल्माषांश्च तिलान्नं च दधि क्षीरं घृतं पयः मृगमांसं च नत्वारं पायसं चापकं मृगम्. शशमांसं च माहिषं
प्रियंगुक्षमधूपाकम्. चित्रांडजफलं कूर्मम्चाविहूं च सशल्लकम्. हविष्यं कृशरान्नं च मुद्गान्नं यवपिष्टकम्. मत्स्या
न्नं चित्रितान्नं च दध्यन्नं दक्षाभक्ष्यमात्. भुक्त्वा राजे भाग्य रथमरेयीति जयसंरीन्. हुताशने तिलैर्हुत्वा प्रजये
न दिगीश्वरम्. प्रणम्य देवं भूदेवानाशीर्वादैर्न तोषयेत्. इत्वा होमं दारुणावातम्मं गोपास्तं जपेत् नकूर्णव
5 स्मगंधाद्यैरर्चयेच्च दिगीश्वरम्. इंद्रमैरावतारूढं शच्यासहविराजितम्. वज्रपाणिं स्वर्णवर्णं दिव्याभरण
भूषितम्. सप्तहस्तं सप्तजिह्वं षडक्षं मेषवाहनम्. स्वाहाप्रियं रक्तवर्णं स्रुक्स्रुवायुधधारिणम्. दंडायु
धं लोहिताक्षं यमं महिषवाहनम्. श्यामलासहितं वर्णे रक्तश्मश्रुं कररवमाम्बम्. खड्गचापधरं नीलं निर्ऋतिं न
रवाहनम्. ऊर्ध्वकेशं विरूपाक्षं दीर्घजिह्वापतिं प्रभुम्. वरुणं मकरिकानाथं रत्नाभरणभूषितम्. प्राणिनां प्रा १
णरूपं तु ध्वजदं दंडपाणिनम्. अभ्यासीनं कुंतपाणिं ध्वबाडुंव स्वसन्निभम्. कुबेरं पत्रलेखवेशं यक्षगंधर्वना
यकम्. पिनाकिनं वृषारूढं गौरीपतिमनुत्तमम्. ध्येनवर्णं चंद्रमौलिं नागयज्ञोपवीतिनम्. इति दिगीशाध्यानम्

॥मन्युसूक्तविधान प्र ३ समग्र

श्री: अथात: संप्रवक्ष्यामि राज्ञ:णां च पराजयम् । शत्रुभि: परिभूतस्तु च मेतां जपेत्सुधी: । संसृष्टं धनमित्यस्य न्यासं कुर्याद्यथाविधि । लिखित्वा षट्दलं पद्मं इंद्रं शत्रुजये यजेत् । इंद्रादि लोकपालांश्च प्रथमावरणे यजेत् । नवग्रहो द्वितीये च आयुधेश्च तृतीयके उपचारै: षोडशभि: सांगावरणदेवता: संपूज्य च जपं कुर्यात्संसृष्टं धनमित्यमुम् । शिवालये नदीतीरे बिल्वमूले हरेर्गृहे । अत्वामंत्रमिमं विद्वान्शत्रुभिर्नाभिभूयते । तत्रासनादि तत्रासनादिभूतशुद्धिप्राणप्रतिष्ठां कुर्यात् । अपसर्पंतु अपक्रामंतु । पृथ्वी मंत्रस्य पृथिव्या प्र थिव्यासनाय कूर्मासनाय नम: आधारशक्तये नम: । दुष्टदानवनाशनाय नृसिंहाय । ॐ गं गणपतये । ॐ सरस्वत्यै । ॐ दुं दुर्गायै । ॐ क्षं क्षेत्रपालाय । ॐ गुं गुरुभ्यो । ॐ पं परमगुरुभ्यो । ॐ परात्परगुरुभ्यो । ॐ परमेष्ठिगुरुभ्यो । ॐ नारदादि संप्रदायप्रवर्तकेभ्यो । तालत्रयं कृत्वा आराध्यदेवताप्रीत्यर्थं भूतशुद्धिप्राणप्रतिष्ठादि करिष्ये । अथ मूलन्यास: । अस्य श्रीशत्रुपराजयमंत्रस्य तापसो मन्युऋषि: शत्रुहेंद्रो देवता । जगती छंद: । शत्रुपराजयार्थे जपे विनियोग: । ॐ संसृष्टं धनं लोकं वज्रहस्ताय अंगुष्ठाभ्यां नम: । उभयं समाकृतं लीशचीपतये तर्जनीभ्यां । अस्मभ्यं दत्तां वरुणश्च मन्यु: लें मध्यमे ... अनामिका । भियं दधाना हृदयेषु शत्रव: लौं पाकशासननायक निं पराजितासो अपनिलयंताल: दत्रे पुरुकरतलकरपृष्ठा । एवं हृदयादि । अथ ध्यानम् । इंद्रमैरावतारूढं वज्रहस्तं शचीपतिम् ।

न्वीयंते द्रुक्तैस्ये क्यसामंजस्येजातावेकत्वभानो निरर्थकइतितदसत्॥ स्वसजातीयनिष्ठभेदप्रतियोगिता
नवच्छेदकैकत्वरूपस्वजातीयद्वितीयरहितत्वमेव एकवचनार्थः॥ नत्वेकत्वमात्रं तस्यवस्तुमात्रसाधारण्ये
नार्थतएवलाभात्॥ अनुपयोगाच्च॥ अतएव पशुनायजेतेत्यादौ पशुनिष्ठतादृशैकत्वस्याविवक्षितत्वात्॥ अनेकप
शुकरणकयागान्नदृष्टसिद्धिः॥ साजात्यंचस्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण
6 अतोनघटोस्तीत्यादौघटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्याप्रसिद्धावपिनक्षतिः॥ एतद्देशाविद्यमानघटनिष्ठ
भेदप्रतियोगितानवच्छेदकैकत्वस्यैव तत्रबोधनात् तस्यचतत्रप्रसिद्धत्वात् देशे बहुघटसत्त्वदशायां तादृशवाक्यप्रयोग देत
श्चजात्येकत्वादेवसमर्थनीयः॥ यत्तुएकत्वाविवक्षायामपिभावाख्यातस्थले एकवचनस्यसाधुत्वदर्शनात् संख्याया अवि
वक्षणेपिसंपन्नोव्रीहिरित्यादौ एकवचनोपपत्तेः तज्जात्येकत्वपरतया तत्समर्थनेनेति तदकिंचित्करं भावाख्यातस्थ
लेगत्यंतरविरहेण विभक्तेर्निरर्थकत्वोपगमात् इतरसार्थक्यसंभवे तत्परित्यागस्यानुचितत्वात्। सतितात्पर्ये तद्बोधस्या
नुभविकत्वाच्चेति॥ एवंत्रयः समुदिताहेतुरित्यत्र हेतुपदं कार्यत्वादप्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नप
रं तादृशसमुदायत्वान्यतमैकत्वमेकवचनार्थः॥ अतएव शरत्वादीनां त्रयाणां तृणारणिमणिन्यायेन हेतुत्व

नमेव सर्वत्र विशेषणपदानंतरं प्रयोक्तुमुचितमिति प्रत्यक्षानुमानोपमानशाब्दाः प्रमाणानि पितरो देवता इत्यादेरनुप
पत्तिः। मैवं। यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्या अविवक्षितत्वं तत्र विध्यविशेष्य
विशेषणपदयोः समानवचनत्वनियमः॥ अत एव पुरूरवोमाद्रवसौ विश्वे देवा इत्यादौ हि त्वविशिष्टयोः पुरू
रवोमाद्रवः प्रभृतो विशेषणत्वयाविवक्षितत्वात्तत्तद्वाचकपदस्य द्विवचनांतता वेदाः प्रमाणमित्यत्र च विशेषण
११ पदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं। तच्च प्रकृत्यर्थावच्छेदके प्रमितकरणत्वे अन्वेति॥ शाब्दप्रमाकरणत्वं च शाब्द
त्वावच्छिन्नयावच्छेदकनिष्ठमेकमेवेति नायोग्यता॥ न च पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिविरोधः। संपन्नो व्रीहिरि
त्यत्रानेकव्रीहितात्पर्यकेप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वात्। यदि चात्र स्वाश्रयप्रकृत्य
र्थतावच्छेदकवत्त्वसंबंधेन प्रकृत्यर्थ एव एकत्वान्वयः व्रीहित्वादिजातेः स्वरूपत एव व्रीह्यादिपदशक्यताव
च्छेदकत्वया अन्वयितावच्छेदकरूपेणानुपस्थितेः। तत्र पदार्थान्तरस्यान्वयानुपपत्तिरिति मन्यसे तदा
प्रकृतेपीदृश्येव गतिः। यत्तु संपन्नो व्रीहिरित्यादौ एकवचनोपस्थितानि नानेकत्वानि प्रत्येकं नानाव्रीहिषु

७

स्फु

ते:॥ स्विदे: छंदसि॥ अपकुरोणमुत्ति॥ विस्फुरोर्तौ॥ प्रजनेवीयते:॥ बिभेतेर्हेतुभये॥
नित्यंस्मायते:॥ स्फुजिह्दोर्ण्हे:स्मकिति॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्यां॥
शीर्षश्छंदसि॥ ऋ॥ ये च तद्धिते॥ अचिशीर्ष:॥ पद्दोमासहृन्निशसन्यूषन्दोषन्य
कञ्शकन्नुदन्नासञ्छस्प्रभृतिषु॥ धात्वादे:ष:स:॥ णो न:॥ लोपो व्योर्वलि॥
वेरपृक्तस्य॥ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्॥ एङ्ह्रस्वात्संबुद्धे:॥ शेश्छं
दसि बहुलं॥ ह्रस्वस्य पिति कृति तुक्॥ संहितायां॥ छे च॥ आङ्माङोश्च॥ दीर्घा
त्॥ पदांताद्वा॥ इकोयणचि॥ एचोयवायाव:॥ वांतोयिप्रत्यये॥ धातोस्तन्नि
मित्तस्यैव॥ क्षय्यजय्यौ शक्यार्थे॥ क्रय्यस्तदर्थे॥ भय्यप्रवय्ये च छंदसि॥
एक: पूर्वपरयो:॥ अंतादिवच्च॥ षत्वतुकोरसिद्ध:॥ आद्गुण:॥ वृद्धिरेचि॥ एत्येधत्यूठ्सु॥
उ.परस्त्रपं॥ ओमाङोश्च॥ उस्यपदांतात्॥

[left margin, vertical:] ...वृद्धिरेचि॥ ...उपसर्गादृति धातौ॥ ...

उभे अभ्यस्तं। जक्षित्यादयः षट्। तुजादीनां दीर्घोभ्यासस्य। लिटि धातोरनभ्यासस्य। सन्यङोः। श्लौ। चङि। दाधाघ्वदाप्। न्मी ह्वांश्च। अङः संप्रसारणं पुगणसोस्तस्य रुषे। वंधुनिवहुधीहौ। वचिस्व पियजादीनां किति। ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभ्रज्जतीनां ङिति च। लिट्यभ्या सस्योभयेषां। स्वापेश्चङि। स्वपिस्यमिव्ये आयङि। न वशः॥१॥ चायः की। स्फायः स्फी निष्ठायां। स्त्यः प्रपूर्वस्य। द्रवमूर्तिः स्पर्शयोः श्यः। प्रतेश्च। विभाषाभ्यवपूर्वस्य। शृतं पाके। प्यायः पी। लि ड्यङोश्च। विभाषाश्वेः। णौ च संश्चङोः। ह्वः संप्रसारणं। अभ्यस्तस्य च। बहुलं छन्दसि। चायः की। अ पस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्ताः। न संप्रसारणे सं प्रसारणं। लिटि वयो यः। वश्चास्यान्यतरस्यां किति। वेञः॥२॥ ल्यपि च। ज्यश्च। व्यश्च। विभाषापरेः। आदेच उपदेशेऽशिति। न व्यो लिटि। स्फुरतिस्फुलत्योर्घञि। क्रीङ्जी नां णौ। सिध्यतेरपारलौकिके। मीनातिमिनोतिदीङां ल्यपि च। विभाषा लीय

8 श्रीगणेशायनमः॥अथास्थिशुद्धिविधानं॥ग्रामाद्बहिः ततोगत्वास्नानं॥सचैलंकृत्वा॥प्रोक्षयेत्पंचगव्येन तत्तन्मंत्रैः
॥उपसर्पेति च तत्स्मृणाशंखः पितरः स्थिरशुद्धाः॥अथर्वा भूमिप्रोक्षणं॥द्वितीयेखननं॥तृतीयेमृत्तिकोद्धरणं॥च
तुर्थेअस्थिग्रहणं॥उपसर्पमातरंभूमिमेतामुरुव्यचसं पृथिवीं सुशेवां॥ऊर्णम्रदायुवतिर्दक्षिणावत एषात्वापा
तुनिर्ऋतेरुपस्थात्॥उच्छ्वंचस्वपृथिविमानिबाधथाः सूपायनास्मैभवसूपवंचना॥मातापुत्रंयथासिचा
भ्येनंभूमऊर्णुहि॥उच्छ्वंचमानापृथिवीसुतिष्ठतु सहस्रंमितउपहिश्रयंतां॥तेगृहासोघृतश्चुतोभवंतु
विश्वाहास्मैशरणाःसंत्वत्र॥उत्तेस्तभ्नामि [illegible] पृथिवीं [illegible] रीमं लोगंनिदधन्मोअहंरिषं॥एतांस्थूणांपितर=
ोधारयंतुतेत्रायमःसादनातेमि [illegible] ः अस्थीनि [illegible] प्रक्षालयेत्॥गोमूत्रगोमयं॥अतोदेवाइति
मंत्रेणमार्जयेत्॥पुरुषसूक्तंसहस्र [illegible] ने॥ततो [illegible] भ्योह्यानि॥नतमंहोनइतिसूक्तंजपेत्॥
ज्यं दशदानंहेमभ्रास्थलंकृत्वा॥गोभूतिलहिरण्यंघृतंवासो [illegible] गुडानिच॥रौप्यंलवणमित्याहुर्दशदा
नाःप्रकीर्तिताः॥पितृदेवेभ्योतिलांजलितर्पणं॥ततो [illegible]॥अजिनंकंबलंगोकेशानाशाणमेवच॥भू
र्जपत्रंतो [illegible] ॥देवस्यत्वेतिकुशान्॥
केश्या [illegible] लंशांलइंद्राग्नीशायां॥भूर्जपत्रंता [illegible] पत्रं॥गायत्र्यापंचसूत्रं॥हिरण्यरूपमितिहिरं

त्यं॥स्त्रं [illegible] इमामनसेत्तिरोप्यं॥अग्निमीळे त्तिरत्नं [illegible] शीरत्तोत्ति त्तिला भूः त्तोन्विंद्र त्तिआ सि भूत्तिइं ल

त्वा॥स्रुरद्ध्व पंचगव्येनाज्येनाष्टशतउशीरत्तोत्तिमंत्रेणाहुं [illegible] र्यात्॥ब्राह्मणान्भोजयेये तु॥भूयसींदक्षिणां

दत्वा॥अग्निरहितश्रद्धिविधानं॥इत्यग्निहोत्रकोद्भ अग्निश्री [illegible] विधानं॥रामा [illegible] भूमाकौ विरोधे होम

युःस्तथा॥कृष्णपक्षेचाष्टम्यां चाग्निरव्यंतसौम्य [illegible] तारणं [illegible] ॥स्वाउत्तिकरभैरवेण लिखितं॥

।शुचिदेशान्मृदं समानीय तीरे संस्थाप्य तां त्रेधा
विभज्यैकेन भागेन जलाद्बहिरेव मस्तक बाहु हृदय पृष्ठोदर कुक्षि हृदयानां
षण्णामनुक्रमेण प्रत्येकं दक्षिणपाणिना लेपं कृत्वा जलेन प्रक्षाल्य त्यक्त्वा॥ द्वितीयेन भागेन कटि वस्ति ऊरु द्वय जंघा द्वय चरण
द्वयानां पंचानामनुक्रमात्प्रत्येकं वामपाणिना लेपं कृत्वा जलेन प्रक्षाल्य ततः तृतीयभागेन करद्वयप्रक्षालनं कृत्वाचम्य
स्नानार्थं जलं प्रविशेत्॥ तदुक्तं वामनपुराणे मृत्तिकां तु त्रिधा कृत्वा भागमेकेन लेपयेत्॥ दक्षिणेनैव हस्तेन अष्टावंगा
न्यनुक्रमात्॥ उत्तमांगं भुजौ वक्षः पृष्ठमुदरं च सकुक्षिकं॥ ततो द्वितीयभागेन नाभिं बस्तिमूरुं जंघकं वामेन करेणैव चरणौ
च यथाक्रमं॥ एवं तृतीयभागेन करौ च क्षालयेत्ततः॥ इत्येवं सम्यक्॥ देशकालौ संकीर्त्य वस्तुतः उत्सर्गतः सर्वेषामेवानां नित्यस्नानाख्यकर्मप्र
शस्तं कर्तुमेव निस्तमस्यनुसारात् जलाद्बहिरेव सकलं तं नेपमस्तकमारभ्यापादतलं मृत्लेपं कृत्वा प्रक्षाल्य एवं कटिमारभ्यपादं तं मृल्ले
पं कृत्वा प्रक्षाल्य ततो मज्जनाभ्यां करौ प्रक्षाल्याचम्य ततो जलं प्रविश्य प्रणवेन स्नात्वा पादितिविष्णु मस्तकाभिमुखः सूर्याभिमुखो वा नि
र्निमज्ज्यांगानि संशोध्य पुनः शिरो निमज्ज्याचम्य प्रणवेन जलमभिमंत्र्य प्रणवेनैव दक्षिणहस्तेन प्रदक्षिणं भ्रामयन् तत्र प्रणवेनैव नि
मज्ज्याचम्य हादशप्रणवैः शिरो बाहु हृदय पृष्ठ यं जलिना षिंचेत्ततो हादशप्रणवैः जलोभ्यंतरे निकृष्य प्राणायामं कृत्वा पुनः निर्नि
मज्ज्याचम्य बहिर्यायादिति वारुणः स्नानं॥ उत्तमांग बाहुद्वय हृत्पृष्ठ कुक्ष्युदर पृथक्॥ कटि बस्ति ऊरु जंघा चरण पंचमृत्करं

9

केशवादिप्रणवान्तरं जलमाश्रये त्रिर्निमज्ज्य बहिरागत्य चतुरस्रमण्डलं कृत्वा चम्पतीरे स्थित्वा अञ्जलिं दत्त्वा तन्मृत्तिकाया द्वा
त्रिभागान् कृत्वा तान् सर्वान् प्रणवेनाभिमन्त्र्य ललाटे १ बाहुद्वये २ हृदये १ पृष्ठे १ कुक्षिद्वये २ उदरे १ चेति कृत्वा गोपीचन्दनमृत्तिका
गोमयलेपमौलमस्योदरे तुलसीविल्वपत्रेण संयुक्तं कण्ठे १ कर्णयोः २ उरुद्वये २ जानुद्वये २ चरणद्वये २ चेति संध्यांगे पुं
यमलिकाभागे कृत्वा मात्स्यचरणद्वयानि तिलपत्रेण भस्मालावशिष्टभोगे न करोति मृत्स्नामाचम्य स्नात्वा नाथजलेन
स्नात्वा इति अथ जलं प्रविश्य प्रणवेनाभिमन्त्र्य प्रणवेन मन्त्रपूतं प्रणवेन त्रिर्निमज्ज्य दाहनाशनपवित्रं
त्रिः मार्जनं कृत्वा नववस्त्रं धारयेत् पादुके च दत्त्वा उत्तरमुखो नाभिमात्रे जले स्थित्वा दाहनाशनार्थं परमपवित्रं पुनः
त्रिर्निमज्ज्य च बहिरागत्य वस्त्रं परिधाय गोपीचन्दनादिकं धारयेत् त्रिपुण्ड्रादिकं कुर्यात् ततः श्वेतवस्त्रं
अर्घ्यं दत्त्वा आचम्य प्रणवेन न्यासं कृत्वा स्वास्ने उपविश्य ततः संकल्पं कृत्वा मन्त्रेण पञ्चदेवताभ्यो ... नमः
पादौ संप्रोक्ष्य मन्त्रेण कलशं स्थापयेत् शंखं तत्र कृत्वा ओं नमो भगवते वासुदेवाय तत्सन्निधौ स्नानं दत्त्वा गन्धादिकं सर्वं समर्पयेत्
नमस्कृत्य त्वां नारायण ... स्वर्गादिकं ... ॥ कृते ... नमो ... गुरुं नमस्कृत्य
... कमण्डलुं ... घण्टावादनं ... लोहितचन्दनेन अर्चयेत् ... आचमनीयं ... तुलसीदलं
... गन्धे ... पुष्पं ... ततः ... धूपं ...
... भवेत् ॥ ततः ... ततः स्नानं ...
... प्रक्षालने कृत्वा प्रणवेन ... ततः स्नानं ...
... इति ॥

श्रीगणेशाय नमः ॥ अथ अस्थिशुद्धिविधानं ॥ ग्रामाद्बहिः ततो गत्वा स्नानं ।
सचैलं तो के । प्रोक्षयेत्सर्वं च गव्येन तत्र मंत्रैः । उपसर्पंति च ततः । शंख
10 पित्तरश्मि ष्टप् ॥ प्रथमे भूमि प्रोक्षणं । द्वितीये खननं । तृतीये मार्जन कौद्धर
णं । चतुर्थे अस्थिग्रहणं । जलस्नानं गत्वा सिंचयेत् ॥ गोमूत्र गोमयं । अतो
देवा इति मंत्रेण मार्जयेत् । पुरुषसूक्तं रुद्रसूक्तानि । एतोन्विंद्रं स्तवाम
वो हस्तानि ॥ ततं होन इति सूक्तं जपेत् । दशदानं हेमश्वा दत्त्वा । गोभूति
२ लहैं [illegible] ज्य वासो धान्य गुडानि च रौप्यं लवणमित्याहुर्दश दानाः प्रकीर्तिताः ।
पिंड नु दृश्यति तिलां [illegible] र्पणं कृत्वा ॥ आर्द्र नकं बलं गो केशतामणमेव च ॥

भूर्जपत्रं ताडपत्रं तिष्ठपाबेटनं स्मृ तां भिन्नस्थं लेख्या जीनं । अग्नि विम्बे
१ कंबलं देवस्य चेइति कुशान् ।। केश्याभिमो वा से ।। शान्त इद्रा मीधुणं भूर्ज
पत्रं ताडपत्रं गायत्र्यो पट्टसूत्रं । हिरण्मयरूपमिति हिरण्यं । चंद्रमा मन
सेति रौप्यं । अग्निमीळे इति रत्नं । उदीरतेति लोमं । एतो न्वि इति अस्थिशु
१ द्धिं कृत्वा ।। स्वस्था पंचगव्येनाज्येनाष्टशतं होमं कुर्यात् ।। उदीरतेति मंत्रे
ण कुर्यात् । ब्राह्मणान्भोजयेत् । भूयसीं दक्षिणां दत्वा । अस्थिशुद्धिवि
धानं ।। इति शौनकोक्तं अस्थिशुद्धिविधानं ।। ६
१

ह्रीं जगत्सर्वं वशंकुरु ॥ वश्यस्तोत्रमिदं देव्यास्त्रिसंध्यं यः पठेन्नरः ॥
सो नीष्टं नाशयेत्सर्वं रामां राज्यमथापि वा ॥ इति वश्यवाराहीस्तो
२ त्रं संपूर्णं ॥
अथ धारे लिंगनाभौ प्रकटितहृदये तालमूले ललाटे द्वे पत्रे षोडशारे द्विदश
दशदले द्वादशार्द्धे चतुष्के। नासांते बालमध्ये डफकठसहिते कंठ
देशे स्वराणां हं क्षं तत्त्वार्थयुक्तं सकलजगदलं वर्ण[illegible]रूपं नमामि १

जामहाज्ञामान्वश्यंध्यामंत्रमहावसु॥महान्ददातिवाराहीराज्ञानेवशमानय॥
अंतर्बहिश्चमनसिव्यापारेषुसमासुच॥यथास्मरतिमामेवंतथावश्यंवशं
कुरु॥चामरंशंखोलिकांछत्रंराजचिह्नानियच्छति॥अग्नीछंसंपुरोराजंत
थादेवीवशंकुरु॥मन्मथरमणाज्ञोमायांतिरंतुमयासह॥स्त्रीरक्तेषुम
हाप्रेमतथाजनयकामदे॥मृगपश्वादयःसर्वेमांदृष्ट्वाप्रमवीक्षिताः॥
अनुगच्छंतिमामेवत्वत्प्रसादात्तथाकुरु॥वशीकरणकार्यार्थंयत्रयत्र
प्रयुज्यसे॥संमोहनास्त्रवह्निर्वातत्कार्यंतत्रकर्षय॥वशमस्त्री
तिचात्रैववशकार्येषुदृश्यते॥तथात्वंकुरुरंवाहीवश्यंसर्वप्रदर्शि
यः॥वशीकरणबाणास्त्रमंत्रनामनिवारितं॥तस्मात्त्ववश्यंवारा

श्रीगणेशायनमः॥ अघोरलिंगनामै०॥ अस्य श्री अघोररुद्र
मंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः सुखे श्री अघोररुद्रो देवता हृदि ॐ
बीजं नामो स्वाहा शक्तिः गुह्ये इष्टार्थे जपे विनियोगः॥ पादयोः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ इति
करषडंगन्यासः॥ लोहितां लोहितां कल्पां लोहितांबररूपेणां॥ चतुर्भुजां त्रिन
यनां प्रसन्नवरनां कुर्जां॥१॥ मल्लं दक्षिणे वामेन चर्म यष्टि समुच्चलों॥ अन्या
न्यांह मपाशेन कंठे बध्वा स्वसाध्यकेहे मवेत्ताह तं बहू करयुग्म हूतां ज
लिं॥२॥ सोहमिति जापं तपतीं रंजन पादयोः॥३॥ इति ध्यात्वा मुद्रां प्रदर्श्य
मूलं॥ इति मूलं॥ जस्मावर्णे लक्षं जपः पुनः ऋष्यादि विधाय गुह्येति निवे
दयेत्॥ मूलं स्वतंत्र चतुस्त्रिंशपटले॥ प्रयाणं च रहिं सा निज पीयूह होन

12

॥पत्रे २ समस्त वश्य वाराही स्तोत्र यथा रं भः॥

नश्वरो भूत्वा तु चसदा हाः स्निहृद्रं बुमरुद्दन्वितं ॥१॥ हंसक्रमरुतायुक्तः प्रो
क्तो विद्याद्दशाक्षरी ॥ षडंगमायया श्लोजपेदक्षरलक्षकं ॥ ततोयमुदि
श्य जपं निशि कुर्यादयलतः ॥ स्वमानये स्वगेहे न मानाशाप्रोक्तकारिणं ॥३॥
नय समाकर्षणं लक्ष्मी सुवर्णं वांछितानि च ॥ प्राप्नोदयलाद्दनयावसर
सिद्धिनिश्चयं ॥४॥ लोहितां० चतु० ॥१॥ मलं० ॥ अन्या० ॥ हेमवे चाह० ॥ इ
सोऽह० ॥ स्मरन्नित्यां जपन्मर्त्यो वशं कुर्याद्यलतः ॥ समस्तजीवजु
वनं मन्त्रारुढास्त्वविपद्यया ॥ अन्वारुढे रक्तवर्णं स्मितसौम्यमुखांबु
जे ॥ राजस्त्री सर्वजंतूनां वशीकरणकामदे ॥ वशीकरणकार्यार्थेपु
रा देवेन निर्मितं ॥ तस्मात्त्वं श्यं वराहीसर्गान्मे वशमानय ॥ यथार

॥१॥

याभिदुषयन्ः स्तोमिमित्रावरुणानाधितो नोहवीभितो नो मुंचतमाग
साः वी० षट् वायोः साधतुर्थिदथ्या निमन्महे योवास्मन्वाधि ष्ट् तौयोवरम
नः यो विश्वस्य परिभूर्बभूव वतुस्तो नो मुंचतमागसाः स्य यज्ञामहे
वायुसवितारा बा जो मुंचातउपमे षानआशिषो देवा यो धे मे अस्थुरस्व
२।२ स्तोमिवायु ॥ संविरम्नो थितो नो हवी भूतो नामुंचतमागसा० वीडिष ॥२॥
रथितमौ रथिना महद्वतये भु भेगामिस्रौ सुयमेर श्वैः ययावं देवौ नि
दिवेषु निशिनमौ स्तो नामुंचतमागसाः स्य यज्ञामहे भिनावा
जो मुंचो यद्यातं वहतुः सूर्याया स्त्रिचक्रेण संसदमुच्छ मानो स्तो
मिदेवाव श्विनौ नाधितो नोहवीभितो नामुंचतमागसाः षट् मरुतां
मन्वे अधिनो ब्रुवंतु प्रेमां वाचं विश्वामवंतु विश्वे आशुन्तु वे सुयमान्

तयेतनो मुंचंतैनसाः स्य यज्ञामाम्हे मरुतएनो मुंचास्त्रमगमा

> आपाये ऋी

कल अघुघाव तिप विचे परि षि ज्यते ऊर्ध्वं यज्ञेषु वर्ह ता३इ वौ३ षट् अग्ने मै
न्वेस थमस्य प्रचेतसो यं पांच मा न्यं बहुधः समिंधते विश्वस्यां विशि प्रवि वि
शिवा ऽ स मिमहे स नो मु चत्व ऽ हे सा३ मृ ।। ये३ यजामहे ग्नि मः होमु चय
स्य हप्रो णांनि मिषद्दंगो तियस्य प्रातं जमि मानं चके वत्स सोम्यो ग्नि न्नाथि
ताजहवी भिस नो मु चत्व ऽ हसा३ वौ३ षट् इद्रस्य मन्ये प्रथमस्य प्रचेतसो
वृत्रघ्नः स्तोमाउपमा मुपागुः यो दाशुष सुकृतो हवमुप गंता सनो मुचत्व ऽ
हसा३ म यै३ यजा महे इम ऽ हो मु चय सं ग्रामं नयति संवशी युधेयः पुष्टा
निसः ऽ स जितियाजिस्तो मीड्य न्नाथितो जो हवी मिस नो मु चत्व ऽ हसा३
वौ३ षट् मन्वे वां मित्रावरुणा तस्य वित्त ऽ सत्यौ जसा दृ ऽ हणा यन्नुदेथे
या राजा नं ऽ स रथं यायो थ उ ग्रा ता नो मु चत मा गसो ऽ म ये३ यजा महे मि
त्रावरुणा वांहो मु चौ यो वा ऽ रथ भृ जु रश्मिः सत्य धर्मा मि थु म्य रंतमुप

सु

वह अनुमतिमा३ वह अग्निं वैश्वानरमा३ वह द्यावापृथिवी
अं हो मुचावा३ वह देवां आज्यपा३ अल्योदिऽउत्तमेभ्ययाज
य ३ येजामहे स्वाहाग्निं स्वाहा सोमं स्वाहाग्निमं मुचं स्वा
हा हेभ्म हामुचस्वाहा मित्रावरुणावागो मुचौ स्वाहा वायो सवितारस्वा
गामुचौ स्वाहा विना वागोमुचौ स्वाहा मरुतएनसोनो मुचस्वाहा विश्वा ॥१॥
देवानेनसो मुचस्वाहाग्निवैश्वानरं स्वाहा द्यावापृथिवीअं होमुचौ
14 स्वाहा देवा आज्यपाइत्यादि अथाज्यभागो अग्निरत्राप्सिसे
द्याभिभुक्त शोचिरमर्त्यो ऋचिपावक३ ईड्योरूम ये यजामहे अग्निंयचेप
वित्रमर्चिष्यग्ने वितततरा ब्रह्मतेनपुनीहा३ इदर्वो३ षट् प्राचार्यापावक
यापरिप्रस्यंदतेसुतः उदुरम्वोनऽ इलियाऽऽम ये येजामहे सोमं गा

x४ अनुमतिंस्वाहा ३४x मर

श्रीगणेशायनमः।। हरिःओ३म् अथमगारेष्टिहोत्रं नमःप्र
वक्त्रइत्यादि शोषचकूहास्तामी माहे३मपामिदन्ययनंसमुद्रस्य
निवेशनं अन्यंते अस्मत्पंक्तुतयःपावको अस्मभ्यं शिवो भवो३न
नमस्तेहर कौशेसेचिषनमस्ते अस्तुचिषि अन्यंते अस्मत्पंक्तुहे
तयःपावको अस्मभ्यंशिवोभवो३ सभिद्धो अग्न आहुतेत्यादि॰ आव
हदेवान्यजमानाय अग्निमग्न आ३ वह सोमं मा३ वह आग्नि
मन्द्रं होमुचमा३ वह इन्द्रं होमुचमा३ वह मित्रावरुणावाग्नि
मुचोवा३ वह वायुसवितारावागोमुचावा३ वह अश्विनावाग्नि
मुचावा३ वह मरुतस्तोमुचमा३ वह विश्वान्देवानन्नोमुचमा३

२

युधं वीतिं सहस्वं स्वः राक्षः पृतना सु जिष्णुस्तो भि देवान्‌ नः तो अग्ने
तोऽहवीभिर्नेनो मुंच त्वेन साः वौषट्‌ देवानां मन्वे अग्निर्नो जुषंतु
प्रमां वाचं विश्वामवंतु विश्वे। आ भूरु वेसुयमानु तयेतेनो मुंचत्वेन सोः स्वाहा। ये श्यमा
श्वा देवानेनो मुंचो यदिदं मुभिशोचति पौरुषेयेण दैव्येन। यो मि विश्वान्देवान्नाथितो जोहवीभिर्नेनसं मुंच
नोध त्वेन सोऽवौषट्‌। अनु द्यामतिर्यज्ञं देवेषु मन्यता। अग्निश्च हव्यवाहनो भवतां दाश्वषे मयो भुव॥
ये ३ यज्ञामहे नु मतिमन्विदनुमते त्वं मन्यासे शं च नः कृधि क्रत्वे दक्षाय नो हिनु प्रण आयूंषि तारिषः
15 वौषट्‌। वैश्वानरो न ऊत्या प्रयातु परावतः अग्निरुक्थेन वाहसा ऊ स्वः ये यज्ञो महे
वैश्वानरं पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा
विवेश वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं
वौषट्‌ ये अग्रये नामभिर्मते भिरत्वाभिर्ये घ्नति पृ अभवनां वस्रनां सो

स्तोभि द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमंहसः ॥३॥ ये इय
मामहे द्यावापृथिवी अंःहो मुचा वुवः रोदसी विश्वः स्वणातं क्षेत्रस्य प
त्नी अधि नो ब्रूयातं स्तोभि द्यावापृथिवी नाथितो जोहवी मि ते नो मुं
चतम्ंहसः ॥४॥ वौषट् अथ स्विष्टकृतः यत्तवयं पुरुषत्रा यविष्ठा विद्वाः
सश्चकृमा कच्चनागः ॥ कृधी स्वस्मांः अदितेरनागाव्येनांःसि
शिश्रथो विष्वगग्ने ॥३॥ ये इ यजामहे अग्निंः स्विष्टकृतमयाळग्निर
ग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाळग्नेरंःहोमुचः प्रि
या धामान्ययाळिन्द्रस्यांःहोमुचः प्रिया धामान्ययाण्मित्रावरुणयो
रांहोमुचोः प्रिया धामान्ययाड्वसवितुरागोमुचोः प्रियाधाः

16

न्ययाऽभिनोरगोमुचोः प्रियाधामान्ययाऽमरुतामेनोमुचोप्रिय
चामान्ययाऽविश्वेषां देवानामेनोमुचो प्रियाधामान्ययाऽनुमत्याः
प्रियाधामान्ययाऽग्नेर्वैश्वानरस्य प्रियाधामान्ययाः द्यावापृथि
व्योरगोमुचोः प्रियाधामान्ययाः देवानामाज्यपानां होविपथा
नद्रसवानामेर्येचिमदिषितामनमुचो यज्ञत्राः एवालमस्मत्वेमुचा मधु
रःप्रान यश्रि मतरान्नआयः ३ वौ ३ षट् स्वदवार अग्निरिदं सोमइदं
अग्निरः होमुगिदं हवि· पेता· ऋतइद्दोः होगिदं· मित्रावरुणावागोमु
चाविदं· पेतां· ऋतां· वायुसवितारावागोमुचाविदं· ऋतां। अग्नि
नावागोमुचाविदं· ऋतां मरुतएनोमुचइदं· पेतां· ऋतां। विश्वेदेवा
एनोमुचइदं· ऋता अनुमतिरिदं हविः जुषतां· अग्निर्वैश्वानर

इदं० इत घावाप्यिनी अः हेमुचाभिदं० षनां० ऋतां देवाभ्याऽऽ
पाद्वन्याहि० वाजिनयागे ज्ञो न्नो भवन्तु वाजिनो हवेषु देवताताः मेद्रु
स्वर्काः। जंभयंतो हिं वृकं रक्षांसि सनेम्यस्मद्यु यवन्नमीवाः ३ स्मे
सुरेनानं याऽस्या पेऽ यज्ञामहे वाजिनो वाजे वाजे वनन वाजिनो ना
नेषु विप्रा अमृता ऋतज्ञा अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथि
भिर्देवयानैः ३ बौ ३ षट् वाजिनस्य अनेवीहि ३ बौ ३ षट् अच्छ यज्ञम
रूपस्य बलात्युपवयस्यो अनिरुपनयस्व ऋत् मानो पहूयस्य
उपहूतइ इतिसूर्ति वचनं पन्मे रतः प्रभि ख्येतयद्या मे अपिगच्छ लियत्
जामेतपुनस्तोनमा शिवमा श्रीविश्रतनमावाजिनं कुरु तस्यते वा
जिनीतस्या पहूतस्योपहूतस्य भक्षयामि प्राणं भक्षं भक्षयेत् ॥ इयं यह लिखना:
प्रगाराधि होत्र समाप्तम् ५ ५ ५

ग्निहोत्रपिंडपितृयज्ञदर्शपूर्णमासौ चक्रतौ ॥ अथ षड्भिः प्रयोकाके यजमानं कर्माणि कृ। प्रतिकुर्यात्
॥ कविप्रक्रमणो सर्पयोनु यज्ञेन यज्ञस्य तत्रैव कुर्यात् । नपनाही निन ॥ नतु सामादिः । पश्चाद्यो जन
नंति ॥ अग्निहोत्री पि सायं प्रातः कल्पान्तरं वदतां ॥ आग्रयणेष्टिः कार्या स्यात् ॥ अथ नवा माहागतस्य विधिः ॥ अ
थ स यजमानो मासं प्राप्य कुर्यात् । अपि तं पात्रं गच्छति हि स स्वि गार्हपत्ये हस्तं । येन दिग्भ्यः परिहृतो वल्लकिर्विं
दतेवन्तु । ततो यत वाकुस निधो गृहीला पुत्रेण शिष्येन वा पूर्वस्था पितेनाग्नीन्निहृत्य तान् ज्वलतस्त्र
त्वा ता नप्सु निर्मृज्य तानो पेनम्रपथा हवनीय स्य पसत्पुरस्ता प्रांत समीपं गत्वानवीक्षेन ॥ विप्रदा जोना
गृहं सो नानुरे गजनसा ॥ अग्नेयमाने घ तिविदेशा दिशान् ॥ नमस्ते अस्तु स इनेन नमस्तउप स इने ॥ अग्नेमुंभस्त
लन्तः संजरण्यास्त्वजे संतेन ॥ तत आनीताः समिध्यो विभज्य लस्य लस्या ग्नेः समीपे निधाय पाहवनीय
17 उप तिष्ठते ॥ मम ता मलवचजा तवेदो वाससी इव दिनसा नोन्नरावः ॥ ते विष्टवो दक्षसो जीव सेन यथा
यथं नो तन्वौ जातवेदः ॥ ततः आहवनीयादि समीपे निहिताः समिधस्त त्रितं तस्मौ नग्नानन्यादधा
ति ॥ आहवनीये ॥ अग्रजन्म विभ्रदेव समस्य स्थं वस्तु विजनं ॥ अग्नेस मा कनि द्युम्नमभिसह आयुष
स्व स्वाहेति ॥ गार्हपत्ये ॥ अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वस्तु वित्तमः ॥ अग्ने गृहपतेऽभि

द्युम्नमभि सह आयच्छस्व स्वाहेति ॥ दक्षिणे ॥ अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्धनः ॥ अग्ने पु
रीष्य द्युम्नमभि सह आयच्छस्व स्वाहेति ॥ सर्वप्राग्न यद्दं ॥ तत्र त्रितयेन गार्हपत्याहवनीया

॰ येन ॥ तस्मान्नो अभि दाव रुणो गृहानस्तु पतं ध्रुवं । जनि नष्टा न विहता स्तूपेनैन म्य राधी तस्मात्पुनरायता
भूमिः ॥ तत्र न स्नेनै वमार्गेणाहवनीय समीपं गत्वा दि तारस्य परिसमूहनं देला विहाय्यो तवन उप विश्य भूर्भु
वस्व रिति नवानं विस्तजेन ॥ एवनदं तं ना स्यमस्ते पेभ इति गार्हपत्ये होम मर्वे स्त्रुवेन पति ॥ नी सिद्धं ॥ इत्य
त्राहूर्ध्व नवासेन्तु आहवनीय समीपगमनानन्तरं ॥ आगाताय स्य प्र वासादागतोहं मनस्य सान
वुर्ध्वं हीलमाज्य होमं कदि कुंड लि कनक्षीक्ष त्र प रुनि चतु र्ग्रहीलं स्र हीलाऽस्त्वनीये ॥ मनो ज्योतिर्जु
ष ना माज्यं जेनि छिन्नं यत्तस्य मिमं दधातु । माइत्ताऽ उपसाय्या स्य निष्ठा स्ता: सं न नो मि हविषा घृते
न स्वाहेनि स्तु यात ॥ मन से ज्योतिषइदं ॥ न ततः परिसमूहनना ग्नि मलंकेकुर्यात् ॥ गृहानीक्षेत
॥ गृहामा बिभीतोपवस्त स्क्षे वोस्मा स्तुवमजाय घं मान वो गोपनी रिष दिति ॥ तत स्तान्मप
येन ॥ गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान् ॥ इरां वहंतो घृत मु क्षमाणास्ते घ्वहं
सुमनाः संविशा मो ति ॥ ततः शिवं शग्मं शं यो: शं यो रिति मंत्रेण स्या नि रस्तु वीक्ष तां कुर्यात् ॥ अ
थवा स्रुचिर्दं धा सितुत्वा विहृतां त्रिः न्लि नां नो र्ध्वं न प्रप घेत ॥ गार्हपत्यस्य पश्चात् लिं तां भयं
वो भयं मे स्त्विति स्तुपस्था य परिसमूहना दिशेषं पूर्ववत् ॥ दक्षाना ना हूर्ध्व प्रवासो ऽपस्थाय म २
न स्याली कुर्यात् परिसमूहना दि पूर्ववत् ॥ अनुपस्थिता ग्नेः प्रवासे इ है व सं ति स्से ना न देव नान्य
कें चि दिन्नु लंट लि स ता ॥ संवत्सरा दूर्ध्वं प्रवासो पविर्जे ॥ [illegible] ॥ प्रवासोपस्थान विधिः ॥ ६ ॥

॥श्रीगणेशाय नमः॥ अग्न्याहिताग्निर्यदि स्वतीर्थेऽग्नीन्विहाय प्रवासार्थं गच्छति प्रवासे तौ प्रवासोपस्थानं
स लागवेत्॥ स च प्रवासार्थं ननीर्थादि पर्थं॥ तदुक्तं त्रिकांडमंडने। इत्याद्यपत्ये पितुं गच्छेत्तीर्थाद्यर्थं नतु कृ नि
दिति॥ विद्यार्थमपि कार्यइत्युक्तं राय चार्यैः॥ तत्र प्रयोगः॥ इदं कर्म आहिताग्निः स्वयमेव कुर्यात्॥
अग्नीन्विहृत्य मजल्पेत्॥ विहाराद्बहिर्गत्वा आचम्य तीर्थेन मति अपगाह्य तस्य पश्चादुपविश्य
प्राणानायम्य मम प्रवासाय जेनार्थं प्रवासविधिं करिष्य इति संकल्प्य॥ आहवनीयस्य वायव्ये संत
समीपं गत्वा तदुपतिष्ठते॥ शंस्य पशून्मे पाहि॥ ततो गार्हपत्यस्य वायव्यदेशे तिष्ठन्॥ नर्य प्रजां मे पा
हि॥ तेनैव मार्गेण दक्षिणाग्नेर्वायव्यदेशे स्थित्वा॥ अथर्व पितुं मे पाहि॥ तत्रैव तिष्ठन्॥ गार्हपत्या
18 हवनीयावीक्षेत॥ इमान्मे मित्रावरुणौ गृहानोपायतं युवं॥ अविनष्टान्विहृता पूषैनानभ्यरक्षे
तस्मात्कं पुनरारायतनादिति मंत्रेण॥ यथागतं तत्पागत्य अग्नीनां प्रदक्षिणं कृत्वा पुनराहवनीयंत
गत्वा उपतिष्ठते॥ मम नामः प्रथमं जातवेदः पिता माता च दधतु यदग्ने॥ ततं विष्टोहि पुनरागमे ततोऽस्त
वाहं नाम विभराण्यग्ने॥ ततः पृष्ठतोऽग्नीनवेक्षमाणो गच्छन् सकल्पितं जपति॥ [illegible] प्रागामपश्चो

नमस्कायद्गा दिरसो भिन्न ॥ मां तस्तु नोऽश्रवान पः ॥ यो यज्ञस्य प्रमा धनस्तंतु देवे ष्वा ततः ॥ तमाहुतं न
शीमहि ॥ मनोन्वाहुवामहे नाराशंसेन सोमेन ॥ पितृणां च मन्मभिः ॥ आनएतु मनः पुनः क्रत्वे दक्षा
यजीवसे । ज्योक् च सूर्यं दृशे ॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः ॥ जीवं व्रातं सचेमहि ॥ वयं सोम व्र
ते तव मनस्तनूषु बिभ्रतः ॥ प्रजावंतः सचेमहि ॥ ततो यत्राग्न गारोपविनजमागे नुदरपले या
नहरं गत्वा वाचं विजेत ॥ ततो यो भिन्न पितृदेवागारमीपं आस्तं आप्य ब्रूयात् ॥ सदास्तुगः पितुमां अस्तु
पंथाम ध्यादेवा ओषधीः संपिदम्न ॥ मगोमे अग्ने सख्ये निष्ट्याउडायो अरण्यां मदनंउरुक्षोः ॥ ततो
गच्छेत् ॥ ॥ अथ पुनानीर्थ प्रवेशं पूर्ववल्लताजघनेन गार्हपत्यं स्थितास्पर्णानग्नी हासदेवोपनिष्ठते
॥ अभयं नो जयमे स्थिति ॥ ततः प्रदक्षिणमावृत्य तीर्थेन निष्क्रम्य मामगाजेतिजप नज्यस्य सदस्तुग
इति पंथानं प्राप्य ब्रूयात् ॥ यदि कदाचिच्च पो नस्तुपस्थानम रुत्वा शालां नावहिः स्थितस्यैव देवा मानवा
द्यानि मित्राऽऽमनं पसज्येत लदान चैव स्थितो सनि कर्मेणा तनम भिंच्याला नालादि शामभेजुइव
उपतिष्ठेत ॥ इहेवसंत नसंतंलाग्ने हदा वाचाजन सानाविभर्मि ॥ ततो मा संतं मा महासी ज्योति षीभ
शालावैश्वानरेण ॥ ततो गच्छेत ॥ प्रवासितस्य पर्व प्राप्तो वपनमजापसजां समल्लवरणभिस्पाद्यमोति १

पमाम्न भवंति । इति काठके होमवा । वठ्व पालमानजन पाठः कर्तव्यः ॥ मामेप त्याकृतिगृह्या

॥गणपतीस्तोत्रप्रारंभः॥ पत्राणी २ समग्र॥

श्रीगणेशायनमः तिथ्यादिसंकीर्त्यममसकुटुंबस्याभीष्टार्थसिद्धिप्रसादनगणपति व्रतमहं करिष्ये अमुककामनार्थं करिष्ये इति
संकल्प्य श्रीगणेशायनमः सूतउवाच पुराकैलासशिखरे मुनयो ज्ञानभूरितः पप्रच्छुर्नमनं कृत्वा ब्रह्माणं विश्वकारणं १
ऋषयऊचुः व्रतानिबहुदानानिकाले दूरेफलंतिहि यत्कृत्वा सर्वसिद्धिस्यात्तद्व्रतं हि त्वं पितामह २ ब्रह्मोवाच शृण्वंतु ऋषयः
सर्वे गुह्याद्गुह्यतरं महत् यत्कृत्वा सर्वसिद्धिस्यात् पार्वतीं चरतस्तथा ३ पूर्वं हिमालये गिरौ गिरिजा अचरत्तपः दुष्करं ऋषिभिः
सर्वैर्बहुकालं हरास्तये ४ ग्रीष्मे पंचाग्निनिरता वर्षा याचशिलातले शरत्काले जलं शीतमसेवत्तमहामनाः ५ तथाकृतेनत
पसा नापश्यच्छंकरं पतिं उद्विग्ना चिंतयामास गणेशं शीघ्रसिद्धिदं ६ तस्मिन्नेव क्षणेविघ्नावि घ्नेशस्तामुपागतः उवाचवु
19 चनं भीतां पार्वतीं विश्वमातरं ७ गणेशउवाच मातस्त्वं चिंतया विष्टा किमर्थं लोकवंदिते त्वत्प्रसादेनलोकानां चिंताहानिर्भवे
त्ततः ८ पार्वत्युवाच मयापुत्र हरस्यार्थे चरितं दुष्करं तपः तथापि मम सिद्धिर्नो जाताकार्यं किमुत्तमो ९ शीघ्रंसिद्धिकरं पुत्र यद्यस्ति
व्रतमुत्तमं तन्मे कथय विघ्नेश करिष्यामि प्रयत्नतः १० यद्यस्मिन्जन्मनि हरं शंकरं नाप्नुयां पतिं तदा शरीरं गंगैव त्यक्ष्यामि विपुलं कि
ल ११ गणेशउवाच व्रतमेकं शुभं मातरासीत शीघ्रसिद्धिदं यत्कृत्वा सर्वथा सिद्धिर्भवेत्तत्कालसंभवा १२ प्रातःस्नात्वा तु
र्थ्यां कृत्वा यदंतधावनपूर्वकं नित्यकर्म चरेद्धीमान् हीनभाषणवर्जितः १३ तत्कथयत्र्यक्षिगा लिंग तानो ध्यानमौनतः क्षिये
त् कृषिमयं चरत्येन पेषयेत् चूर्णयेत्पुनः १४ सर्वेभ्यो तंदुलं गृह्य पृथक्कृत्वा प्रयत्नतः दक्षिणावर्ज संजातपिष्टतुलंव यं क्षिपेत् १५

ग०स्तो० लड्डुकान्पञ्च भक्ष्यांश्च एकैकं तिलसंयुतान् सिंदूरस्य च कार्याणि मातरश्च दलानि षट् १६ मध्यमे पूजयेन्मां हि यथा
शक्त्या च भो नृपः षड्भिर्दूर्वांकुरैस्तद्वत्पुष्पैः पूगीफलादिभिः १७ दक्षिणाभिस्तथा द्रव्यैर्धूपादिस्वेच्छया तथा आगमो
क्तेन मंत्रेण पूजयेन्मां यथाविधि १८ रक्तवस्त्रोपरिस्थाप्य स्वर्णेन कृतं हि मां चतुर्भुजं महाकुंडं चंद्रशेखरमर्चयेत् एकविंशति १९३
वारं हि जप्त्वा पुष्पांजलिं क्षिपेत् अष्टोत्तरशतं तेन जुहुयात्तिलसर्पिषा २० नैवेद्यं लड्डुकानां च स्थापयेन्मम संनिधौ
एवं प्रकारं हि कुर्यादाचार्यं पूजयेत्ततः २१ वस्त्रादिभिरलंकारैस्तोषयेच्च प्रयत्नतः श्रुणुया [illegible] कथामेतां पश्चाद्ब्राह्मणभोज
नं २२ स्वयं भुंजीत लड्डुकान्स्त्री नैव नाधिकं शुभे यत्र पूजा कृता तत्र भोजनं शयनं चरेत् २३ नोत्तिष्ठेच्च ततः स्थानात्प्रातःकाला
वधि स्थितः न तस्मात्वै भूसंस्पर्शे पतत्वप्रभावि फलाकरं २४ शुभस्त्वन्मे जागरं च शुभे च शयनं पुनः कुर्याद्देवं व्रतमात्मनैमेवा
चारणं २५ यदि वा न भवेत्तस्माद्वितीयां न प्रकारयेत् तत्रस्तमः सर्व वेन भवतेवनसंशयः २६ प्रातः स्नायं भक्त्या पूज
येच्च ततः परं आचार्याय प्रदेशांतां प्रदद्यान्मत्स्वरूपकं २७ नैवेद्यं भक्षयेत्तस्मादन्यान्नैव तु कं शुभे एतज्ञाप्युत्तरं प्रातस्त्व
त्प्रकाशे प्रकाशितं २८ ब्रह्मोवाच एवं कृतं व्रतं देव्या पार्वत्या कृतवंतः पुरा गणेशसन्निधिमापाल[illegible]वैशांकरः पतिः २९ गणेशः
कथयित्वेति स्वयमंतर्हितोभवत् इदं कुर्याच्च गांधार्या कृतं भक्त्या सुशोभनं ३० कुंती पुत्रान् पंच लेभे गांधार्यैकोत्तरं शतं नला
न्वेषणकामार्थं दमयंत्या मया पुनः ३१ वेदार्थं कृतं विप्रा जानासि हि द्वशीघ्रतः आयुःकामेन कर्तव्यं धनकामेन वापु

२

नः २२ पुत्रकामाद्रतिकामादर्थकामाच्च संचरेत् अनिरुद्धस्य संमासे कलेनाचरितं तथा ३३ सीतान्वेषणकामेन राघ
वेणापि यत्कृतं जानातयोः फलप्राप्तिर्यूयं कुरुत निश्चिताः॥३४॥ सूत उवाच एतच्छ्रुत्वाव्रतं चक्रुर्मैनयः सि
द्धिमागताः सर्वकामैर्व्रतं कार्यमोदेवं बादरायणः ३५ य इदं शृणुयाद्भक्त्या श्रावयेद्वा समाहितः ते सर्वे विघ्नरा
जस्य कृपया पूर्णसिद्धयः ६ ३६ इति श्रीपद्मपुराणे शौनकसिद्धिकरं क्षिप्रप्रसादनगणपतिव्रतं संपूर्णं
अस्य श्री क्षिप्रप्रसादनगणपतिमंत्रस्य गणकऋषिः क्षिप्रप्रसादनो विघ्नेश्वरो देवता विराट् छंदः गं बीजं
नमः शक्तिः जपे विनियोगः गं क्षिप्रप्रसादनाय नमः मंत्रः पूजादौ नमोंतः होमांते [illegible]ः स्वाहांतः
इति गणपतिस्तोत्रं संपूर्णं शुभं भवतु॥ २

20

॥ गणपति स्तोत्रं समाप्तं ॥

भते मानवस्तथा ।। समंगलं भवेत्सौख्यं श्री हस्तेन निवेदितं ।। ४५ ।। शकारे चिंतितं कार्यं सर्वयानिनि
३ र्थकं ।। नास्ति किंचिद्ध्रुसन्मानसे देवभ्रमते मनः ।। ४६ ।। षकारे सर्वकार्याणि दृश्यंते शोभनानि च ।
क्षेमं च सर्वकार्येषु स्त्रीणां चैव समागमः ।। ४७ ।। सकारे सर्वसौख्यं च पुत्रं चैव समागमः ।। सिद्धि
क्षेमं तथारोग्यं सर्वेषां शुभमुत्तमं ।। ४८ ।। हकारे चिंतितं कार्यं स्वस्थानं लाभमुत्तमं ।। सिद्धिश्चै
व सुखं लक्ष्मीः सर्व स्वं निर्भयं भवेत् ।। ४९ ।। क्षकारे चार्थलाभश्च स्त्रीलाभस्तथैव च ।।
सुवर्णं बहुरौप्यं च लभते नात्र संशयः ।। ५० ।। इति व्यासफल शकुनपद्धति लिखितं ।। ० ।। ० ।।
मातृकासिद्धिसदृशी शुभा भवति वासना ।। मोक्षो विपुललाभः स्याज्जीवितं सफलं
भवेत् ।। ५१ ।। ॐ ह्रीं ह्रीं चिटि चिलि मिलि मिलि मातंगासिद्धिकरी सिद्धिं दर्श
य दर्शय स्वाहा ।। ० ।। इदं मंत्रं सप्तवारं जपित्वा कुमारिकादि हस्तेन मुक्तादि फलं द
हा शकुनं विचारयेत् ।। ० ।। ॐकारे बहुलाभस्याद्धर्मकामार्थमोक्षदः ।। बहु
२ लाभो भवेन्नित्यं सर्वा सिद्धि प्रजायते ।। ५२ ।। ० ।। श्रीकृष्णार्पणमस्तु ।। ० ।।
3

३२

भिर्भुजाभिः॥ खड्गं खेटं हलमभयदं बिभ्रती वामदोर्भिः॥ सिंहारूढामयुगनयनां विभ्रतां कोल
वक्त्रां वंदे देवीं सकलसफदां पंचमीं मातृमध्ये॥ १॥
ऐं ग्लौं ऐं भगवति वार्तालि १ वाराहि वराहमुखि १ वाराहमुखि १ अंधे अंधिनि नमः रुंधे रुंधिनि नमः जंभे जं
भिनि नमः मोहे मोहिनि नमः स्तंभे स्तंभिनि नमः सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगा
तिजिह्वास्तंभं कुरु १ शीघ्रं वशं कुरु १ ऐं ग्लौं ठः ठः हुं फट् स्वाहा॥ १॥ अथन्यासः॥ वार्तालि १ अंगु
ष्ठाभ्यां नमः। वाराहि १ तर्जनी स्वाहा॥ वाराहमुखि १ मध्यमाभ्यां वषट्॥ अंधे अंधिनि नमः अनामि
काभ्यां हुं॥ रुंधे रुंधिनि नमः कनिष्ठिकाभ्यां वौषट्॥ वार्तालि वार्तालि हृदयाय नमः वाराहि १ शिरसे
स्वाहा॥ वाराहमुखि १ शिखायै वषट्॥ अंधे अंधिनि नमः कवचाय हुं॥ रुंधे रुंधिनि नमः नेत्रत्रयाय वौषट्॥
इति न्यासः॥ अथ ध्यानं॥ कौशेयार्द्रोरुकां चारु प्रवालमणिभूषणां॥ हलेन मुशलेनापि वरदेनाभयेन च॥
विराजितचतुर्बाहुं कपिलाक्षीं शुभं ध्यायं॥ नीलां चिन्निलां ... कुर्वां॥ ५॥ इति ध्यानं॥ १॥

॥३॥

नि॰ त्नं व्रतयात्राविवाहेषु श्राद्धे होमेऽर्चने जपे आरब्धे सूतकं न स्यादनारब्धे तु सूतकं प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः
नांदीश्राद्धविवाहादौ श्राद्धे पाकक्रियेति पाकस्य परिसमंतात्क्रियापाकप्रोक्षणमिति शुद्धिप्रदीपः तन्मंत्रे तीर्थेति-श्रा
२५ द्धेचे आकस्मिकतीर्थप्राप्तौ विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि न तत्र सूतकं तद्वत्कर्म यज्ञादिकारयेदिति
पैठीनसिस्मृतेः अत्राविशेषः प्रायुक्तो जपः पुरश्चरणादिः स्तोत्रपाठः अविच्छेदेन संकल्पितहरिकंराश्रवणा
दिश्च अत एवोक्तं प्राहलोमहोमविषयस्यापि न स्यादन्यस्य कस्यचिदिति एवं वेदपूजादिमन्त्रपारिजाते यमोपि शि
23 वविष्णुवर्त्तदीक्षावस्यचाग्निपरिग्रहः श्रौतकर्माणि कुर्वीत स्नानाच्छुद्धिमवाप्नुयात् गोऽप्युद्धितत्वे मं
त्रमुक्तावल्यां जपोदेवार्चनविधिः कार्योदीक्षान्वितैर्नरैः नास्ति पापं यतस्तेषां सूतकंवायतात्मनां रा
घवदीपेनारदः अथसूतकिनः पूजां वक्ष्यमाणं प्रबोदितां सा ताविस्मयं निर्वेमानस्याक्रियमतुवेवात्यपूजा
कर्मेलोवध्यानयोगेन पूजयेत् यदिकामीतन्नेत्कामीनित्यपूर्वन्नचरेत् यत्तु नृसिंहकल्पे मत
मंत्रजपं प्रकुर्यात् यदि स्यादशौचिनां ॥ तत्तत्रविहितकाम्यकर्मसंतत्त्वरेण तत्स्थापको

कोऽपि आपद्यपि च कष्टायां सद्यः शौचं विधीयते इति पारस्करस्मरणेऽपि नाशौचं तथाच शुद्धिरत्नाकरे दक्षः
स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितं आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकं अतः सति वैराज्ये सत्या
सोऽप्यातुरस्य भवतीति केचित् अथ कर्मतः निर्वाप्यौ केषां तत्कार्ये बुसद्य इत्याह नृपनृपदीक्षितर्त्विक्
मि स्वदेशाभ्रंशामस्वप्यानेकर्क्षतिपठनमिषकारुशिल्प्यातुराणां संस्पर्शे दुःखसुहृदोपानपनजनआद्युपृष्ठ
मतिष्ठाचूडातीर्थार्थं योऽग्राजपारिप्लवमाप्नुवन्नुदकेऽत्रदर्थे नाशौचमिति शेषः सत्री अन्नसत्रवा
न् मुक्तसन्नस्य दीक्षितपदात् सिद्धे व्रती अनन्तरं व्रतादिनियमवान् नव्रती नो व्रते इति विस्मृतेः मन्चे
ताः कारवः शिल्पिनो वैद्या दासीदासास्तथैव च नव्रतिनो व्रते इति विस्मृतेः राजानो राजभृत्याश्च स
द्यः शौचाः प्रकीर्तिताः कारवः सूपकाराद्याः शिल्पिनश्चैकृतिलिंजकाद्याः आतुरस्य व्याधिना
शार्थे दानादौ तुलादानादेः रम्भोजारीआद्यसंकल्पो वा यजनं तडागोत्सर्गकोटिमोहादि लघुविम्बः

ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकशर्मा ज्ञाताज्ञातस्य पापक्षयकामो अष्टोत्तरसहस्रं सावित्रीजपमहं करिष्ये ॥ तत
उपवासं हविष्यं वा कुर्यात् ॥ तत्परदिने उपसिस्नानादिकं कृत्वा स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ॥ विष्णुः ॐ अद्येत्यादि अ
स्व॥ मुकगोत्रः श्री अमुकशर्मा अमुकदेवतायाः अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकमंत्रसिद्धिकामो अद्या
रभ्य यावता कालेन सा स्यात् तावत्कालम् अमुकमंत्रस्य इयत्संख्यातद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशां
शब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये इति संकल्प्य जपं कुर्यात् ॥ अभिषेकयाक्यं तु मूलमुच्चार्य नमो तो अमुकदेव
तामहमभिषिंचामि इति कलशमुद्रया स्वमूर्ध्नि अभिषिंचेत् ॥ तथा च नमोत मंत्रमुच्चार्यति देते देवताभिधा ॥ द्वितीयांतमहंय
श्च दभिषिंचाम्यनेन तु ॥ अभिषिंचेत् स्वमूर्धानं तोयैः कुंभाख्यमुद्रया ॥ ततो दक्षिणा ॥ ॐ अद्य कृतैतदमुकदेवतायाः अमु
कपुरश्चरणकर्मणः सांगतार्थं दक्षिणामिदं कांचनं यथानामगोत्राय गुरवे तुभ्यमहं संप्रददे ॥ ततो छिद्रावधारणं कुर्या
त् ॥ अथ ग्रहणपुरश्चरणसंकल्पः ॥ तद्यथा ॥ अमुकेत्यादि अमुकगोत्रः श्री अमुकदेवशर्मा रिक्तग्रस्ते निशाकरे दिवाक
रे वा अमुकदेवताया अमुकमंत्रसिद्धिकामो ग्रासादिमुक्तिपर्यंतं जपरूपपुरश्चरणमहं करिष्ये इति संकल्प्य जपेत् ॥
ती॥ = तत्परदिने स्नानादिकं विधाय ॐ अद्येत्यादि अमुकगोत्रस्य कृतैतद्ग्रहणकालीनइयात्संख्यजपतद्दशांशहोमतद्दशांश
तर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनकर्माण्यहं करिष्ये ॥ इति संकल्प्य होमादिकं कुर्यात् ॥ दक्षिणं पूर्ववत् ॥
त्र पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे ॥ वा पुण्यक्षेत्रे शिवालये ॥ यदि कुर्यात् पुरश्चर्यं तत्र क्रमं निचिंतयेत् ॥ अथ क्रम
चक्रम्॥ दीपस्थाने समाश्रित्य कृतं कर्म फलप्रदं ॥ चतुरस्रं भुवं मिला कोष्ठानां नवकं लिखेत् ॥ पूर्वकोष्ठादि विलिखेत्सप्तव
र्गान्नुक्रमात् ॥ लक्ष्मीशमध्यकोष्ठे स्वरान्युग्मक्रमाल्लिखेत् ॥ दिक्षु पूर्वादितो यत्र क्षेत्राख्या टु सरस्थितिः ॥ मुखं तस्य
जानीयाद्धस्तानुभयतस्थितो ॥ कोष्ठे कुक्षौ तु भेया दोहू शांब पुच्छमीरितं ॥ क्रमेणानेन विभजेन्मध्यस्यमपि भागतः ॥ मु
खस्यालभते सिद्धिं करस्थः स्वल्पजीवनं ॥ कुक्षौ नाशमवाप्नोति पादस्थो दुःखमाप्नुयात् ॥ पुच्छस्थः पद्मतेमंत्री बंधनोच्चाटनादिभिः ॥

गुर्मचक्रमिदंप्रोक्तं मंत्राणांसिद्धिसाधकं॥अथमंत्राणांदशसंस्काराः॥जननंजीवनंपश्चात्ताडनंबोधनंतथा॥अथाभिषेको
विमलीकरणाप्यायनेपुनः॥तर्पणंदीपनंगुप्तिर्दशैतामंत्रसंस्क्रियाः॥स्वर्णादिपात्रेसंलिख्यमातृकायंत्रमुत्तमं॥काश्मी
रचंदनेनापिभस्मनावाथसुव्रते॥काश्मीरंशाक्तिसंस्कारेचंदनंवैष्णवेमनोः॥शैवेभस्मसमाख्यातंमातृकायंत्रलेखने॥मं
त्राणांमातृकामध्यादुद्धारोजननंस्मृतं॥पंक्तिक्रमेणविधिनामुनिभिस्तत्रनिश्चितं॥प्रणवांतरितांकृत्वामंत्रवर्णा
ञ्जपेत्सुधीः॥प्रत्येकंशतवारंतुजीवनंतदुदाहृतं॥मंत्रवर्णान्समालिख्यताडयेच्चंदनांभसा॥प्रत्येकंवायुबीजेनस्तविताडनं
मतं॥विलिख्यमंत्रवर्णांस्तुप्रसूनैःकरवीरजैः॥तन्मंत्रवर्णसंख्यातैर्हन्याद्रेफेणबोधनं॥तंत्रतंत्रोक्तविधिनाअभिषेकःप्र
कीर्तितः॥अश्वत्थपल्लवैःसिंचेन्मंत्रीमंत्रार्णसंख्यया॥संचिंत्यमनसामंत्रंसुषुम्णामूलमध्यतः॥ज्योतिर्मंत्रेणविधि
वद्दहेन्मलत्रयंयती॥तारव्योमाग्निमनुयुक्दंडीज्योतिर्मनुर्मतः॥मनुरौकारः॥दंडीमनुस्वारः॥ओमेव्योमहकारः॥
अग्निरेफः॥स्वर्णंनकुशातोयेनपुष्पतोयेनवातथा॥तेनमंत्रेणविधिवद्धाप्यायनविधिस्मृतः॥मंत्रेणवारिणामंत्रेणतर्प
णंतर्पणंस्मृतं॥मधुनाशक्तितंत्रेतुवैष्णवेचेंदुमज्जलैः॥शैवेघृतेनदुग्धेनतर्पणंसम्यगीरितं॥अभिषेकेपितथा॥ॐह्रीं
श्रीतारमायारमायोमनोर्दीपनमुच्यते॥जाप्यमानस्यमंत्रस्यगोपनंत्वप्रकाशनं॥संस्कारदशसंप्रोक्ताःसर्वमंत्रे
षुगोपिताः॥यान्कृत्वासंप्रदायेनमंत्रीवांछितमाप्नुयात्॥मलत्रयमितिप्रोक्तंआणवमायिककर्मीणं॥मायिकंनामविकंना
परोक्षोस्यपौरुषंकर्मणांमलंआणवंतद्द्वयंज्ञेयंनिबिडंतन्मलत्रयं॥तारमायारमायोइतितारमाबीजपुटितेनजपे
न्मनुं॥शतमष्टोत्तरंचैवदीयतेसाधकोत्तमः॥ ॥इतिश्रीमद्बलांसांख्यपातंजलशास्त्रेषुसर्वागमशास्त्रेषुश्रौतवे
दांतगतआश्वलायनशाखाध्यायीबुधवल्लेकरोपनामकबालंभट्टपरनामाब्रह्मानंदेनविरचिताश्रीगुरुस्मरणवि
धिः॥ ॥ ॥अथगुप्तदानंलिख्यते॥ ॥गुप्तदानंप्रवक्ष्यामिसर्वपापनिकृंतनं॥मनोरथावाप्तिकरंसर्वदेवप्रियं
सदा॥१॥सर्वरोगापहरणंअवाच्यघनिबर्हणं॥अगम्यागमनोद्भूतपापदुःस्वप्ननाशनं॥२॥महारहस्यादिभवेत्तस्य

णादेव नश्यति॥ स्व◌र्यपरकार्यादिक्लुप्तं तत्र स्यमसंभवं॥३॥ निवार्यते क्षणादेव सुखारोग्यप्रदायकं॥ पुष्पदानं
इति ख्यातं दानानामुत्तमोत्तमं॥४॥ फलपुष्पं पुष्पपुष्पं धान्यपुष्पं तथैव च॥ रत्नपुष्पमिति ख्यातं पुष्पदानचतुष्टयं॥
५॥ आयुष्कामि पुष्पमध्ये धनं वित्तानुसारतः॥ सहस्रं वा तदर्द्धं वा तदर्धपादमेव च॥६॥ विलग्नाछं न कुर्वीत स्वात्मसंयतमेव वा॥
क्षिपेत्पुष्पं समासाद्य देवस्य पुरतस्तथा॥७॥ इष्टदेवं स्मरेदत्र मनसा तत्परायणः॥ कुलिनं शास्त्रानिष्ठं च वेदाचाररतं शुचिं॥८॥
आढ्यब्राह्मणं भक्त्याह्यर्चयित्वा धूपपुष्पकैः॥ पुष्पदानोक्तमंत्रेण दत्वा विप्रं विसर्जयेत्॥९॥ सर्वसमस्तकामिकं सर्वदेवप्रियकरं सदा॥ आ
युरारोग्यमतुलं पुष्पदानात्प्रयच्छमे॥१०॥ सम्यस्तपुष्पदानानां शतयाद्ध्याच्च दक्षिणां॥ संतानकामि कूष्मांडफलमध्ये विशेषतः॥
११॥ बालकृष्णं स्मरेदत्र अर्चयेद्ब्राह्मणोत्तमं॥ फलस्नेनोक्तमंत्रेण दद्याद्दक्षिणया सह॥१२॥ सद्यस्तत्प्रतिबंधेपि पुत्रप्राप्तिर्न संशयः॥
मृतवंध्या च पुत्रार्थे नारिकेलफलं तथा॥१३॥ अभ्यर्च्य भक्त्या विप्रं तु रत्नं नीमावयेदथ॥ मृतवंध्यात्मदोषेण महासंतापसंयुता॥
॥१४॥ पुत्रान्हि मृतं नं देहि सुपुत्रान्मे प्रयच्छमे॥ अनेन फलदानेन श्रीकामी लभते श्रियं॥१५॥ शचीसमेतं देवेंद्रं गजारूढं स्मरेदथ॥
इंद्र श्रेष्ठानिवेदोक्तमंत्रेणाथ प्रदापयेत्॥१६॥ लभेत सर्वसौभाग्यं राजराजत्वमेव च॥ जिह्वारोगी दंतरोगी उदरव्रणरोगवान्॥१७॥
ग्रंथिरोगयुतो वा पिलूत्यादिव्रणरोगवान्॥ बीजपूरफलाख्येन दानेन व्रणवर्जितः॥१८॥ निरोगी जायते सद्यः स्कंदस्य स्मरणादपि॥
रक्तपुष्पादिपुष्पेन रक्तरोगो विनश्यति॥१९॥ भैरवस्मरणं तत्र सूर्यस्मरणमेव वा॥ ज्वरादिसर्वरोगाणां धान्यपुष्पं समाचरेत्॥२०॥
हनुमंतं स्मरेदत्र विष्णु वाथ विशेषतः॥ धान्यपुष्पाख्यदानेन सर्वरोगालयं यपुः॥२१॥ राज्यार्थं धान्यपुष्पं च भानुभौमदिने तथा॥
राज्यलाभो न संदेहो राजलांछनलब्धवान्॥२२॥ कन्याविवाहकामी च पुष्पदानं समाचरेत्॥ लक्ष्मीनारायणं ध्यात्वा दानकाले
विशेषतः॥२३॥ जयार्थं युद्धकाले च शतकेसरपुष्पकं॥ कार्तवीर्यहनूमंतं संस्मरन्दानमाचरेत्॥२४॥ नष्टं राज्यं पुनः प्राप्ये
पुंडरीकं प्रदापयेत्॥ राज्यलाभेन संयुक्तो भुवि कीर्तियुतो नरः॥२५॥ अन्येषु सर्वकार्येषु फलपुष्पं समाचरेत्॥ ॥

इत्यलं विस्तारेण॥ ॥इति श्री रुद्रयामले पुष्पदानविधिः॥ ॥श्रीरस्तु॥ शुभं भवतु॥ ॥श्रीशिवरामहलहरि॥ १०

श्रीः

